॥ शिवषडक्षर स्तोत्रम ॥

ॐकारं बिंदुसंयुक्तं नित्यं ध्यायंति योगिनः ।
कामदं मोक्षदं चैव ॐकाराय नमो नमः ॥ १ ॥
नमंति ऋषयो देवा नमन्त्यप्सरसां गणाः ।
नरा नमंति देवेशं नकाराय नमो नमः ॥ २ ॥
महादेवं महात्मानं महाध्यानं परायणम ।
महापापहरं देवं मकाराय नमो नमः ॥ ३ ॥
शिवं शांतं जगन्नाथं लोकानुग्रहकारकम ।
शिवमेकपदं नित्यं शिकाराय नमो नमः ॥ ४ ॥
वाहनं वृषभो यस्य वासुकिः कंठभूषणम ।
वामे शक्तिधरं वेदं वकाराय नमो नमः ॥ ५ ॥
यत्र तत्र स्थितो देवः सर्वव्यापी महेश्वरः ।
यो गुरुः सर्वदेवानां यकाराय नमो नमः ॥ ६ ॥
षडक्षरमिदं स्तोत्रं यः पठेच्छिवसंनिधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥ ७ ॥
॥ इति श्री रुद्रयामले उमामहेश्वरसंवादे
षडक्षरस्तोत्रं संपूर्णम ॥